# केरलस्य बालिद्वीपस्य च कृषिरीतिमधिकृत्य टिप्पणिं लिखत।

उन्नतशिरस्कैः नारिकेलवृक्षैः कदलीवनैः व्रीहिक्षेत्रैः औषधसस्यारामैः गिरिनिर्झरिणीभिः च समावृतो बालिदेशः केरलाद्बहिः अपरः केरलदेश इव भाति। पैतृकीं संस्कृतिं हठादाश्लिष्यत्ययं देशः। केरलेषु इव प्रकृतेः लास्यभावेन सांस्कारिकप्रतिभासैः आचारविशेषैः आराधनासम्प्रदायैः च विशिष्टोऽयं देशः। विशिष्टतया व्रीहिकृषिसम्प्रदाये केरलानाम् उपतिष्ठते अयं देशः। केरलस्येव कार्षिकसहकारिसङ्घः, कार्षिकविपणनकेन्द्राणि, कार्षिकोत्सवः, व्रीहिलवनोत्सवः इत्यादीनि तत्र प्रवर्तन्ते। अत एव पोट्टक्काट् महाशयेन केरल इति अयं देशः व्यपदिष्टः।